


# व्यक्तिः स्ववचनेन एव ज्ञायते

एकदा कश्चन महाराजः मन्त्रिणा सह मृगयार्थं वनं गच्छति। मृगयन् सः महाराजः श्रान्तः भवति। अतः अश्वम् अवरुह्य एकस्य वृक्षस्य अधः विश्रामं करोति। महाराजः पिपासितः अपि भवति। सः मन्त्रिणं वदति- मम पिपासा अस्ति। किञ्चित् जलम् आवश्यकम् इति।



मन्त्री महाराजस्य वचनम् अनुसृत्य जलं प्राप्तुं वने इतस्ततः भ्रमणं करोति। भ्रमणं कुर्वन् एकत्र एकं कुटीरं पश्यति। सः तत्र गच्छति। तस्मिन् कुटीरे एकः दृग्विहीनः मुनिः निवसति।

मन्त्री तं मुनिं प्रति गच्छति तथा अविनयेन वदति- अरे! अहम् एकः मन्त्री अस्मि। अस्माकं महाराजः पिपासितः अस्ति। जलम् आवश्यकम्। शीघ्रातिशीघ्रं दीयताम् इति।




मुनिः खिन्नः भवति। कोपेन वदति- महाराजं वदतु यदि जलम् आवश्यकं चेत् अत्र आगमनीयम् इति।

मन्त्री महाराजं प्रति गच्छति। महाराजं वदति- एकत्र जलं प्राप्तं किन्तु तत्र कश्चन मुनिः अस्ति। सः मुनिः क्रूरः। सः वदति महाराजस्य जलम् आवश्यकं चेत् सः स्वयम् एव अत्र आगच्छतु इति।

महाराजः किञ्चित् चिन्तयन् मुनिं प्रति गच्छति। मुनेः क्षेमं पृच्छति। अतिविनयेन निवेदयति- मुने! अहं श्रान्तः अस्मि। किञ्चित् जलं लभ्यते वा इति। मुनिः अपि प्रीतिपूर्वकम् अवश्यम् इति वदति। पुनः वदति- इच्छति चेत् फलं स्वीकृत्य कुटीरे किञ्चित् विश्रामम् अपि करोतु।

महाराजः सन्तोषम् अनुभवति। मुनिं वदति- भवान् अतीव दयालुः। भवतः सत्कारेण अहम् अनुगृहीतः अस्मि। किन्तु एकः प्रश्नः अस्ति। यदा मम मन्त्री अत्र आगतः तदा भवान् जलं न दत्तवान्। अपितु कोपेन निषिद्‌धवान्। अहं चिन्तितवान् भवान् कठोरः इति। किन्तु अत्र आगत्य पश्यामि यत् भवान् तु अतीव दयालुः। अहं ज्ञातुम् इच्छामि किमर्थम् व्यवहारे एतादृशः भेदः इति।




मुनिः प्रतिवदति- भवतः मन्त्रिणः व्यवहारः उद्‌धतपूर्णः आसीत्। तस्य वचनम् उद्‌दण्डपूर्णम् आसीत्। किन्तु भवतः भाषणं सादरपूर्वकम् आसीत्। अतः मया ज्ञातं यत् भवान् एव महाराजः। ततः मया भवान् सेवितव्यः इति।

महाराजः पुनः वदति- सः मन्त्री अपक्वबुद्धिः। क्षम्यताम् इति। मुनिः प्रतिवदति- व्यक्तिः स्ववचनेन, स्वव्यवहारेण एव ज्ञायते। तस्य समीपे कियत् धनम् अस्ति इति न गणनीयम्। एतस्मिन् जीवलोके जीवात्मा नगण्यः इति ज्ञातं चेत् यावत् सिद्धिः प्राप्यते तावत् एव व्यक्तिः विनयशीलः भवति।

